S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Stout,** *a.* महा-स्थूल-काय, बृहच्छरीर, मांसल, स्थूलशरीर, प्रबल, महाबल, बलवत्. 2 धीर, विक्रांत, शूर, प्रगल्भ (heart). **-ness,** *s.* शरीरस्थूलता, मांसलता.

**Stove,** *s.* चुल्लि-ल्ली *f.*, अधिश्रयणी, अग्निकुंडं, अश्मंतं, उद्धानं, अंतिका.

**Stow,** *v. t.* (कोशे) निविश् *c.*, नि-धा 3 U, स्था *c.* (स्थापयति); *See* **Store,** also.

**Straddle,** *v. i.* प्रगतजंघ *a.* स्था 1 P.

**Straggle,** *v. i.* व्यभिचर् 1 P, विक्रम् 1, 4 P, मार्गात् प्र-वि-चल् 1 P or च्यु 1 A or भ्रंश् 1 A, 4 P. **-er,** *s.* भ्रष्ट-भ्रांत-पथः, व्यभिचारिन् *m.*, नष्टपथः.

**Straight,** *a.* सरल, ऋजु, अजिह्म, अकुटिल, अभुग्न, अवक्र, समरेख, अनराल, प्रगुण, अंजस; 'the s.-stemmed lotus' अनरालनालनलिनी. *-adv.*, 's.-way' सपदि, अनंतरमेव; सद्यः, तत्कालं, अविलंबितं. 2 सरलं, अवक्रं, ऋजु. **-en,** *v. t.* ऋजूकृ 8 U, सरलीकृ. **-ly,** *adv.* सरलं, अवक्रं, ऋजुतया, &c. **-ness,** *s.* सारल्यं, आर्जवं, अकौटिल्यं. **-Straightforward,** *a* ऋजु, सरल, शुचि, ऋजु-सरल-प्रकृति; *See* **Honest. -ly,** *adv.* सरलं, अवक्रं, ऋजुतया; स्पष्टं, व्यक्तं. **-ness,** *s.* आर्जवं, सारल्यं, दाक्षिण्यं.

**Strain,** *v. t.* आयस् *c.*, अत्यंतं आकृष् 1 P; 's. every nerve' सर्वात्मना प्रयत् 1 A. 2 अत्यंतं तन् 8 U, अतितानेन अभिहन् 2 P; *See* **Sprain.** 3 (Juice) निष्पीड् 10, निर्गल् *c.*, निष्कृष् 4 (Filter) शुध् *c.*, पू 9 U, विमलीकृ 8 U, स्रु *c*; 'should s. through a cloth' स्रावयेत् पटात्. 5 (To the bosom) *See* **Clasp**; 'this is not the time to s. courtesies' अत्युपचारपूर्वकं-यथाचारं-व्यवहर्तुं नायंसमयः. *-v. i.* अत्यंतं प्रयत् or उद्यम् 1, A or आयस् 1,4 P or व्यव-सो 4 P. 2 निर्गल् 1 P, स्रु 1 P. *-s.* आयासः, अतियत्नः-श्रमः. 2 प्रवहणं, अत्यंताकर्षः; *See* **Sprain.** 3 तानः, संततस्वरः. 4 आ-,कर्षणं, विततिं *f.* 5 रीति *f.*, प्रकारः. 6 विषयः. **-ed,** *a.* वितत, आ-,कृष्ट &c. 2 (Meaning) क्लिष्ट, नेयार्थ. **-er,** *s.* गालनी, चालनी, शोधनी.

**Strait,** *a.* संकट, संबाध, अनायत, संकुचित; *See* **Narrow.** *-s.* कृच्छ्रं, कष्टं, संकटं, दुर्दशा, कष्टावस्था, संकटावस्था; 'in s. s' कृच्छ्रगत, कष्टापन्न. 2 सामुद्रधुनी, संकटमार्गः. **-en,** *v. t.* पीड् 10, सं-,बाध् 1 A, संकुच् 1 P; 's. ed circumstances' (अर्थ-) कृच्छ्रं, कष्टं, दुर्गति *f.*

**Strand,** *s.* तीरं, तटं, कूलं. *-v. t.* उत्कूलयति (D.). *-v. i.* तीरं प्राप् 5 P.

**Strange,** *a.* अपूर्व, वि-,चित्र, अद्भुत, आश्चर्यभूत; 'what is s. in this' किमत्र चित्रं. 2 विदेशीय, परकीय; *See* **Foreign.** 3 अप-वि-रूप, विलक्षण, असंगत, असंबद्ध, अलौकिक (की *f.*), असंभव. 4 अपरिचित. असंस्तुत, अज्ञातपूर्व. *-interj.* चित्रं, अहोबत चित्रं, आश्चर्यं. **-er,** *s.* आगंतुकः, अभ्यागतः. 2 वैदेशिकः, विदेशीयः, वैदेश्यः. 3 परः, परपुरुषः, पारक्यः, अपरिचितः, अन्यजनः 4(*a.*) अपरिचित, अनभ्यस्त, अनभिज्ञ, अज्ञात; 'we are s. s to the use of chariots' वयं अनभ्यस्तरथचर्याः (U. 5). **-ly,** *adv.* अद्भुत चित्रं. **-ness,** *s.* अपूर्वता, वैचित्र्यं, वैलक्षण्यं, &c.

**Strangle, Strangulate,** *v. t.* कंठं निपीड्य श्वासं निरुध्-मृ *c.* or व्यापद् *c.*, गलहस्तयति (D.); श्वासं अव-नि-रुध् 7 U. **-ing, -ion,** *s.* गलपीडनं, गल-हस्तः, श्वासावरोधः.

**Strangury,** *s.* अश्मरी, मूत्रकृच्छ्रं.

**Strap,** *s.* चर्मपट्टः-बंधः, वरत्रा, वध्री, नध्री. *-v. t.* चर्मपट्टेन प्रहृ 1 P or तड् 10.

**Stratagem,** *s.* उपायः, कल्पना, युक्ति *f.*, अप-व्यप-देशः, छलं, कपटोपायः, छद्मन् *n.*

**Strategy,** *s.* युद्धकौशलं, समरपाटवं, व्यूहरचनाविद्या-नैपुण्यं.

**Stratum,** *s.* स्तरः, फलकः-कं, आ-सं-स्तरः.

**Straw,** *s.* पलः, पलालः-लं, नालः-लं, तृणं (fig. also), शुष्कधान्यं; 'to make s. of', 'not to care a s. for' तृणाय-तृणं-मन् 4 A; 'a man of s.' तृणमूर्ति *f.*; कल्पितपुरुषः.

**Stray,** *v. i.* (यूथात् &c.) भ्रंश् 1 A, 4 P, व्यभिचर् 1 P, (मार्गात्) प्र-,विचल् 1 P, प्र-,भ्रंश्. 2 प्रमद् 4 P, स्खल् 1 P; *See* **Err, Mistake. -ed,** *a.* प्र-,भ्रष्ट, च्युत, विचलित, भ्रांत, मार्गभ्रष्ट, नष्टपथ, यूथभ्रष्ट. 2 (Thoughts) निरन्वय.

**Streak,** *s.* रे(ले)खा, राजि *f.*; 's. of lightning' विद्युल्लेखा. *-v. t.* रेखाभिः अंक् 10, चित्रीकृ 8 U; 's. ed with gold' कनकरेखाभिः सनाथीकृत, हेमरेखांकित. **-ed,-y,** *a.* रेखांकित-चिह्नित, चित्र, चित्रित, शबल.

**Stream,** *s.* स्रोतस् *n.*, सरित् *f.*, नदी. 2 स्रोतः प्रवाहः, रयः, ओघः, प्रवृत्ति *f.*, वेला, वेगः, प्रस्रावः, धारा-रः; 's. of rain' पर्जन्यधारा. *-v. i.* वृष् 1 P, सततं प्रवह् 1 P or प्रस्रु 1 P. 2 **Radiate, Extend,** q. v. **-er,** *s.* पताका, केतुवसनं. **-ing,** *a.* संतत or निरंतरप्रवाहिन् or स्राविन्. **-let,** *s.* क्षुद्र-कु-सरित्; अल्पस्रोतः.

**Street,** *s.* पथिन् *m.*, मार्गः; वीथि-थी *f.*, रथ्या, प्रतोली, विशिखा; 'royal s.' राजमार्गः-पथः, महापथः, संसरणं.

**Strength,** *s.* *See* under **Strong.**



Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007